श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ त्रिनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिनवतितमः सर्गः ॥

## श्रीरामस्य यज्ञे वाल्मीकेरागमनं रामायणगानार्थं तस्य कुशीलवौ प्रत्यादेशः

वर्तमाने तथाभूते यज्ञे च परमाद्भुते।
सशिष्य आजगामाशु वाल्मीकिर्भगवानृषिः॥ **7.93.1** ॥

स दृष्ट्वा दिव्यसङ्काशं यज्ञमद्भुतदर्शनम्।
एकान्त ऋषिवाटानां चकार उटजाञ्शुभान्॥ **7.93.2** ॥

शकटांश्च बहून् पूर्णान् फलमूलांश्च शोभनान्।
वाल्मीकिवाटे रुचिरे स्थापयन्नविदूरतः॥ **7.93.3** ॥

आसीत् सुपूजितो राज्ञा मुनिभिश्च महात्मभिः।
वाल्मीकिः सुमहातेजा न्यवसत् परमात्मवान्॥ **7.93.4** ॥

स शिष्यावब्रवीद्धृष्टौ युवां गत्वा समाहितौ।
कृत्स्नं रामायणं काव्यं गायेथां परया मुदा॥ **7.93.5** ॥

ऋषिवाटेषु पुण्येषु ब्राह्मणावसथेषु च।
रथ्यासु राजमार्गेषु पार्थिवानां गृहेषु च॥ **7.93.6** ॥

रामस्य भवनद्वारि यत्र कर्म च कुर्वते।
ऋत्विजामग्रतश्चैव तत्र गेयं विशेषतः॥ **7.93.7** ॥

इमानि च फलान्यत्र स्वादूनि विविधानि च।
जातानि पर्वताग्रेषु चास्वाद्यास्वाद्य गायताम्॥ **7.93.8** ॥

न यास्यथः श्रमं वत्सौ भक्षयित्वा फलान्यथ।
मूलानि च सुमृष्टानि न रागात् परिहास्यथः॥ **7.93.9** ॥

यदि शब्दापयेद् रामः श्रवणाय महीपतिः।
ऋषीणामुपविष्टानां यथायोगं प्रवर्तताम्॥ **7.93.10** ॥

दिवसे विंशतिः सर्गा गेया मधुरया गिरा।
प्रमाणैर्बहुभिस्तत्र यथोद्दिष्टं मया पुरा॥ **7.93.11** ॥

लोभश्चापि न कर्तव्यः स्वल्पोऽपि धनवाञ्छया।
किं धनेनाश्रमस्थानां फलमूलाशिनां सदा॥ **7.93.12** ॥

यदि पृच्छेत् स काकुत्स्थो युवां कस्येति दारकौ।
वाल्मीकेरथ शिष्यौ द्वौ ब्रूतमेवं नराधिपम्॥ **7.93.13** ॥

इमास्तन्त्रीः सुमधुराः स्थानं वापूर्वदर्शनम्।
मूर्च्छयित्वा सुमधुरं गायेथां विगतज्वरौ॥ **7.93.14** ॥

आदिप्रभृति गेयं स्यान्न चावज्ञाय पार्थिवम्।
पिता हि सर्वभूतानां राजा भवति धर्मतः॥ **7.93.15** ॥

तद् युवां हृष्टमनसौ श्वः प्रभाते समाहितौ।
गायेथां मधुरं गेयं तन्त्रीलयसमन्वितम्॥ **7.93.16** ॥

इति सन्दिश्य बहुशो मुनिः प्राचेतसस्तदा।
वाल्मीकिः परमोदारस्तूष्णीमासीन्महामुनिः॥ **7.93.17** ॥

सन्दिष्टौ मुनिना तेन तावुभौ मैथिलीसुतौ।
तथैव करवावेति निर्जग्मतुररिन्दमौ॥ **7.93.18** ॥

तामद्भुतां तौ हृदये कुमारौ
    निवेश्य वाणीमृषिभाषितां तदा।
समुत्सुकौ तौ सुखमूषतुर्निशां
    यथाऽश्विनौ भार्गवनीतिसंहिताम्॥ **7.93.19** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे त्रिनवतितमः सर्गः॥